# कलिदिनसंख्याम् अवलंब्य केरळसंस्कृतकवीनां कालनिर्णयः

**Dr. Sreenivasan P.K.**

कवीनां अन्यरचयितॄणां वा जीवनकालनिर्णयने केरळीयसंस्कृतसाहित्यस्य इतिहासकाराः कलिदिनमिति एकां कालसूचकसंख्यापद्धतिं बहुत्र अवलम्बन्ते । कलिदिनगणनाविषयः कलिदिनाद् वर्षगणनाविषयश्च ज्योतिषग्रन्थेषु तथा च गणितग्रन्थेषु वर्णितावेव । किन्तु द्विशतवर्षात्पूर्वं का आसीत् कलिदिनसंख्या इति ज्ञातुं सरलोपायो नास्ति । केवलं ज्योतिषज्ञैरेव कलिदिनगणनासंप्रदायः ज्ञायतेति ।

उल्लूर्-इलंकुलं प्रभृतीनाम् एतद्विषयग्रन्थेषु अनया पद्धत्यैव प्रायशः कालगणना कृता । तत्र स्खलितं सञ्जातम् । तलक्कुळत्तु गोविन्दभट्टतिरिमहाशयस्य जीवनान्तकालनिर्णये २० वर्षाणां न्यूनता संजाता इति द्रष्टुं शक्नुमः । ईदृशदोषा अन्यत्राप्यभवन् बहुत्र । तद्वत् पूर्विकेतिहासकारैर्या कलिसंख्या प्रमाणत्वेन स्वीकृता वर्तते तया संख्यया एव तैर्यदुक्तं तद्दोषयुक्तमिति निरूपणं कर्तुं शक्यते । पुनश्च अस्मात् कलिदिनात् कोलंबवर्षस्यैव संख्या दत्तमस्ति इतिहासकारैः । कलिदिनात् दिनांकनिर्णयं वासरनिणयमपि कर्तुं शक्यते । तत्सम्बद्धस्य क्रिस्त्वब्दस्य गणनमपि सुलभमिति प्रदर्शनमेवात्र कृतम् ।

कलिदिनात् वर्षनिर्णयविषये अंशद्वयं ज्ञातव्यम् । प्रथमं तावत् कलिदिनवाक्यस्य संख्या अथवा अङ्करूपपरिवर्तनं द्वितीयं तु कथं तस्य वर्षरूपेणपरिवर्तनं कार्यमिति । तत्र कलिदिनवाक्यरचनायां प्रत्येकस्य अङ्कस्य प्रत्येकः अक्षरो निश्चितः तस्य ज्ञानमावश्यकमेव । स्वराक्षराणामङ्कः शून्यं (०) व्यञ्जनाक्षराणां अङ्क एवं भवति यथा...

| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | ० |
|---|---|---|---|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण | त | थ | द | ध | न |
| प | फ | ब | भ | म | | | | | |
| य | र | ल | व | श | ष, क्ष | स | ह | ळ | |

सन्ध्यक्षरेषु द्वितीयवर्णस्यैव अङ्कः स्वीकर्तव्यः । यथा क्त- क्अत अत्र त एव द्वितीयं अतः क्त इत्यस्य तकारस्य अङ्कः षड् भवति । क्य चेत् क् + य अतः एकम् । एवमन्यत्रापि । संख्यातु एक -दश-शत इति वामत एव वर्धयति, संख्यानां वामतोगतिरिति चोक्तं तदभिज्ञैः । अतः कलिदिनसंख्यायाः वाक्यकरणे एकस्थानस्थिताङ्कस्यैव अक्षरं प्रथममनन्तरं दशस्थानस्येवमग्रेच । महात्मा गान्धिवर्यस्य जन्मदिनस्य कलिदिनवाक्यं सुनामंशापजह्यम् १८१५५०७ इति ।

भारतस्य स्वतन्त्रतायाः दिनस्य कलिदिनसंख्या संवृद्धलाभजय १८४३९४७ इति । एतत्तु गतपूर्णदिनानि एव । एतस्मात् कलिदिनात् उद्दिष्टकलिदिनं न्यूनीकृत्य यल्लभ्यते तत् ३६५.२४१२९ (Mean tropical solar year length) इति संख्यया विभज्यते चेत् वर्षाणि हरणफलरूपेण लभ्यन्ते । १९४७-०८-१५ इति दिनाङ्कात् हरणफलवर्ष-मास-दिवसाः न्यूनीकुर्वन्ति चेत् स्वतन्त्रतादिनात्पूर्वकालस्य वर्षसंख्या लभ्यते । एवमेव ११२२-१२-३० इति कोल्लवर्षदिनांकात् करोति चेत् कोल्लवर्षसंख्यापि ज्ञातुं शक्यते ।

कलिदिनसंख्यातः शुक्रवासरादि वासरनिर्णयं एवं भवति यथा कलिदिनसंख्यां सप्तेन विभजनं कार्यम् । शिष्टसंख्या वासरनामबोधयति यथा ० (७) शुक्रवारः, १ शनिवारः, २ रविवासरः, ३ चन्द्रवासरः, ४ कुजवासरः, ५ बुधवासरः, ६ गुरुवासरः । गतपूर्णदिनानि एव निर्दिश्यन्ते कलिदिनसंख्यया ।

उदाहरणाय 1815507 / 7 = 259358.143, .143 x 7 = 1 = Saturday

1843947- 1815507 = 28440 / 365.24129 = 77-10-12 yrs.

(1947- 08- 15) - (77-10-12) = AD 1869- 10 -03, इदं तु गान्धिमहाशयस्य जन्मदिनम्। एकदिनस्य भेदः अस्य गणनासंप्रदायस्य स्थौल्याज्जातं कोल्लवर्षविषयेपि दिनांकविषये ईषत् भेदस्संजायते किन्तु तन्नदोषाय । (1122-12-30) - (77-10-12) =1045-02-18. कोल्लवर्षः । अत्र माससंख्या एवं भवति यथा १ चिङ्ङम्, २ कन्नि, ३ तुलां, ४ वृश्चिकं,५ धनु, ६ मकरं, ७ कुम्भं, ८ मीनं, ९ मेटं, १० इटवं, ११ मिथुनं, १२ कर्क्टम् इति ।

महाकविना उळ्ळूर् एस् परमेश्वरय्यरेण कृते केरळसाहित्यचरित्रमिति साहित्येतिहासपुस्तके यत्र यत्र कलिदिनसंख्या स्वीकृता ताः सर्वाः परिशीलयामः ।

वररुचेः पुत्र अग्निहोत्रिमहाशयस्य जन्मतिथिविषये पुरुथीसमाश्रयः १२५७९२१ इति कलिदिनवाक्यं दत्तमस्ति[१] । अस्य कलिदिनस्य ए. डि. ३४३ , यागक्रियायाः समापनं यज्ञस्थानंसरक्ष्यम् १२७०७०१ इति कलिदिनवाक्यं च ए.डि. ३७८ इति च दत्तमस्ति । पूर्वोक्त पद्धत्या परिशोधयतिचेत् १२५७९२१ इति कलिदिनस्य ए.डि. १९-०२-३४३ शुक्रवासरः, १२७०७०१ इति कलिदिनस्य ए. डि. १५-०२-३७८ बुधवासरः इति च लभ्यते ।

१). 1257921 / 7 =179703, Balance = 0 = Friday.

1843947-1257921 = 586026 / 365.24129 = 1604y 5m 26d.

(1947-08-15) – (1604-05-26) =AD. 343-02-19.

AD 825 तमे वर्षे एव कोल्लवर्षारंभ इति सुविदिदमेव ।

२). 1270701 / 7 =181528.714, .714 x 7 = 5 = Wed.

1843947 – 1270701 = 573246 / 365.24129 =1569 – 05 – 30.

(1947-08-15) – (1569-05-30) = AD. 378- 02- 15. Wed.

शङ्कराचार्यमहाभागस्य जन्मतिथिनिर्णयार्थम् आचार्यवागभेद्यया १४३४१६० इति कलिदिनवाक्यस्य अवलंबं करोति । अस्य कलिदिनस्य ए. डि. ८९५ इति वर्षसंख्यामपि दत्तमस्ति२ । मेषमासे अष्टादशदिने आद्रानक्षत्रदिवसे इत्यपि लिखितम् । किन्तु मूलानक्षत्रं शुक्रवासरः सिंहमासश्चेति लभ्यते गणना कृते चेत् ।

३). 1434160 / 7 = 204880, bal. = 0 = Friday.
1843947- 1434160 = 409787 / 365.24129 = 1121 – 11 – 17.
(1947-08-15) – (1121-11-17) = AD. 825- 08- 28. Friday.
(1122-12-30) – (1121-11-17) = Kollam. 01- 1- 13. Friday. अत्र दिनपर्यन्तशद्धिर्नलभ्यते, कोल्लवर्षस्य प्रथमसंवत्सरे प्रथममास इत्यत्र सन्देहोनास्ति । अत्र ७० वर्षाणां भेदोदृश्यते ।

तलक्कुळत्त् गोविन्दभट्टतिरिमहाशयस्य जन्मतिथिगणनार्थं रक्षेद्गोविन्दमर्कः १५८४३६२ इति कलिदिनसंख्यां दत्तमस्ति[३] ।
४). 1584362 / 7 = 226337.429, .429x 7= 3 = Monday.
1843947 – 1584362 = 259585 / 365.24129 = 710- 08 – 20.

(1947-08-15) – (710-08-20) = AD. 1236 - 11- 25.Tuesday. अत्र 24-11- 1236 Monday इति स्वीकर्तव्यम् ।

अस्यैवमहाशयस्य चरमगतिविषये कालिन्दीप्रियतुष्टः १६१२८९१ इति कलिवाक्यं दत्तम्।
५). 1612891 / 7 = 230413 = 2310413. Bal. 0 = Friday.
1843947 – 1612891 = 231056 / 365.24129 = 632- 07 – 10.
(1947-08-15) – (632-07-10) = AD. 1315 - 01- 05.Saturday. 04-01-1315 शुक्रवासर एव तद्दिनम् 1612891 – 1584362= 28529 / 365.24129 = 78yrs.
AD 1237 + 78 =1315. चरमवर्षविषये २० वर्षाणां भेदः यतः इतिहासकारेण १२९५ इत्येव लिखितम् ।

रुद्रस्य विवरणमिति ग्रन्थस्य रचनाकालः भद्रागीर्न्निधृताद्य १६९०३२४ कोल्लवर्षः ७०२ इति च दत्तमस्ति । 1690324 / 7 = 241474.857, .857 x 7= 6 =Thursday.
1843947 – 1690324 = 153623 / 365.24129 = 420- 07 – 09.
(1947-08-15) – (420-07-09) = AD. 1527 - 01- 06.Thursday.
(1122-12-30) – (420-07-09) = Kollam. 702- 5- 21. धनुमासः । अत्र भेदोनास्ति।

केळल्लूर् नीलकण्ठसोमयाजि महाशयस्य जीवनकालं कोल्लवर्षः ६४०-७२० इति वदति४ । तन्त्रसंग्रहमिति ग्रन्थस्य उपक्रमे हेविष्णोनिहितंकृत्स्नं १६८०५४८ इति कलिदिनवाक्यं लभ्यते । तस्यैव उपसंहारे लक्ष्मीशनिहितध्यानैः १६८०५५३ इति कलिदिनवाक्यं च लभ्यते । पुन इतिहासरचनाकृतेन वदतियतन्त्रसंग्रहस्यारंभः ६७६ तमे कोल्लवर्षे मीनमासे २६ दिने , अवसतिः मेष १ दिनांके च इति ।
७). 1680548 / 7 =240078.286, .286 x7 =2 =Sunday.
1843947 – 1680548 = 163399 / 365.24129 = 447- 04 – 14.
(1947-08-15) – (447-04-14) = AD. 1500 - 04- 01.Sunday.
(1122-12-30) – (447-04-14) = Kollam. 675 मीनमासः
८). 1680553 / 7 =240079. Bal. =0 = Friday.

1843947 – 1680553 = 163394 / 365.24129 = 447- 04 – 09.
(1947-08-15) – (447-07-09) = AD. 1527 - 01- 06.Thursday.
(1122-12-30) – (420-04-09) = Kollam 675 मीनमासः। अत्र वर्षस्यैकस्य भेदोस्ति।
मळमङ्गलत्तु शङ्करन्नम्पूतिरिमहाशयस्य जन्मतिथिमधिकृत्य जातोयंहंसतुल्ये १६७८१६८ इति कलिवाक्यं दृश्यते[८]। एतत्तु कोल्लवर्षे ६६९ तमे वर्षे इत्यपि इतिहासकारेण दत्तमस्ति।
९). 1678168 / 7 =239738.386, .386 x 7 =2 = Sunday.
1843947 – 1678168 = 165779 / 365.24129 = 453- 10 – 20.
(1947-08-15) – (453-10-20) = AD. 1493 - 09- 25.Sunday.
(1122-12-30) – (453-10-20) = Kollam. 669 कन्निमासः । अत्र कोल्लवर्षगणनायां भेदोनास्ति, ए.डि. वर्षसंख्या अधुना दत्तञ्च ।

चित्रभानु नम्पूतिरिमहाशयस्य करुणामृतम् इति ग्रन्थः कोल्लवर्षे ७०६ तमे वर्षे कृतमस्ति । तत्र कलिदिनवाक्यमेवमेव बुद्ध्योन्मथ्योद्धृतंयत्नात् १६९१५१३ इति[६]।
१०). 1691513 / 7 =241644.714, .714 x 7 = 5 = Wed.
1843947 – 1691513 = 152434/ 365.24129 = 417- 04 – 06.
(1947-08-15) – (417-04-06) = AD. 1530 - 04- 09. Wed.
(1122-12-30) – (417-04-06) = Kollam. 705 मीनमासः । अत्रापि किंचित् भेदोस्ति।

मळमंगलत्तु परमेश्वरन् नम्पूतिरिमहाशयस्य आशौचदीपकमिति ग्रन्थस्य अन्तिमेभागे जालांगेधनसेव्य १७०९३३८ इति कलिदिनवाक्यं कोल्लवर्षः ७५४ इति च इतिहासकारेण दत्तमस्ति[७]।
११). 1709338 / 7 =244191.143, .143 x 7 =1 = Saturday.
1843947 – 1709338 = 134609/ 365.24129 = 368- 06 – 17.
(1947-08-15) – (368-06-17) = AD. 1579 - 01- 28.
27- 01-1579 Saturday.इति सत्यम्। (1122-12-30) –(368-06-17) = Kollam.754 मकरमासः । अत्र कोल्लवर्षगणनायां भेदोनास्ति, ए.डि. वर्षसंख्या अधुना दत्तञ्च ।

तृक्कण्टियूर् अच्युतपिषारटि महाभागः ७९६ तमे कोल्लवर्षे पञ्चत्वं गतः । मेल्पत्तूर् नारायण भट्टतिरि महाशयेन कृते श्लोके पञ्चत्वंगतस्य दिनस्य कलिदिनवाक्यमेवं निर्दिष्टं विद्यात्मास्वरसर्पत् १७२४५१४ इति[८] । १२). ए. डि. १५-०८-१६२० शनिवासरः ७९६ चिङ्ङमासश्च । अत्र कोल्लवर्षगणनायां भेदोनास्ति, ए. डि. वर्षसंख्या अधुना दत्तञ्च ।
तृक्कण्टियूर् अच्युत पिषारटि महाभागस्य उपरागक्रियाक्रम इति ग्रन्थस्य निर्मितिकालः कोल्लवर्षः ७६३ इति ग्रन्थस्यास्य अन्तिमश्लोकाल्लभ्यते । तत्र प्रोक्त- प्रवयसोध्याना१७१४२६२ इति कलिवाक्यमस्ति[९] । १३). कुजवासरः , ए. डि. २१- ०७-१५९२ , ७८७ कर्किटमासश्च । अत्र ७८७- ७६३ = २४ वर्षाणां भेदोस्ति ।

नारायणीयस्य परिसमाप्तिविषये आयुरारोग्यसौख्यं १७१२२१० इति[१०] कलिदिन-संख्यामवलम्बते । तत्र ७६२ तमे कोल्लवर्षे वृश्चिकमासे २८ दिने रविवासरे इत्यपि

इतिहासकारेण प्रदर्शितम् । १४). किन्तु सोमवासरः ०८-१२ -१५८६ , ७६२वृश्चिकमासश्च इति ज्ञातुं शक्नुमः । प्रक्रियासर्वस्वमिति ग्रन्थस्य रचनाकालविषये एवं कलिदिनवाक्यौ दत्तौ स्तः । आरम्भः यत्नफलप्रसूस्यात्[११] १७२३२०१, अवसतिः कृतरागरसोद्य १७२३२६१ इति च । कोल्लवर्षे ७९१ तमे अब्दे मकरमासे द्वितीयदिनांके आरम्भः षष्टिदिनात्परं मीनमासे तृतीय दिनांके समाप्तिश्चाभवदिति इतिहासकारेण दत्तमस्ति । १५). आरंभः कुजवासरे १०-०१-१६१७., कोल्लवर्षस्तु ७९२ धनुमासः । अत्र वर्षैकस्य भेदः । १६).अन्तिमदिनन्तु शनिवासरः ११-०३-१६१७, कोल्लवर्षस्तु ७९२ कुम्भमासः ।

उदयवर्मचरितकारस्य रविवर्मणः निर्याणविषये कोल्लवर्षसंख्या ६७६ इति दत्तमस्ति । तदर्थं हेविष्णोर्निहितंकृत्स्नम्-१६८०५४८ इति संख्या दत्तमस्ति१२ । रविवासरः ०१-०४-१५००. कोल्लवर्षस्तु ६७५ मीनमासः । अत्रापि वर्षैकस्य भेदः । तन्त्रसंग्रहे रविवर्मणः विषये च कलिदिनसंख्या एक एव ।

शंकराचार्यस्य कालविषये ७० वर्षाणां, तलक्कुळत्तु गोविन्द भट्टतिरि महाशयस्य चरम-कालविषये २० वर्षाणां, उपरागक्रियाक्रमनिर्मितिकालविषये २४ वर्षाणां च भेदो दृश्यते ॥

१. Kerala Sahityacharitram, Ullur S. Parameswara Ayyar. Kerala University Publication. V Edition, Oct. 1990. Vol.1 p196.
२. Ibid p112.
३. Ibid p196.
४. KSC Vol.2 p 132.
५. Ibid p 298.
६. Ibid p 299.
७. Ibid p 339.
८. Ibid p 355.
९. Ibid p 356.
१०. Ibid p 388.
११. Ibid p 422.
१२. Ibid p 391.